# .. shrI hanUmat pa ncha chAmaram ..

## ॥ श्री हनूमत् पञ्च चामरम् ॥

नमोऽस्तु ते हनूमते दयावते मनोगते
सुवर्णपर्वताकृते नभस्स्वतः सुताय ते ।
न चाञ्जनेय ते समो जगत्त्रये महामते
पराक्रमे वचःक्रमे समस्तसिद्धिसङ्क्रमे ॥ १॥
रविं ग्रसिष्णुरुत्पतन् फलेच्छया शिशुर्भवान्
रवेर्गृहीतवानहो समस्तवेदशास्त्रकम् ।
भवन्मनोज्ञभाषणं बभूव कर्णभूषणं
रघूत्तमस्य मानसांबुजस्य पूर्णतोषणम् ॥ २॥
धरात्मजापतिं भवान् विभावयन् जगत्पतिं
जगाम रामदासतां समस्तलोकविश्रुताम् ।
विलङ्घ्य वारिधिं जवात् विलोक्य दीनजानकीं
दशाननस्य मानसं ददाह लङ्कया समम् ॥ ३॥
विलोक्य मातरं कृशां दशाननस्य तद्वने
भवानभाषत प्रियं मनोहरं च संस्कृतम् ।
समस्तदुष्टरक्षसां विनाशकालसूचनं
चकार रावणाग्रतः नयेन वा भयेन वा ॥ ४॥
महाबलो महाचलं समुह्य चौषधिप्रभं
भवान् ररक्ष लक्ष्मणं भयावहे महावहे ।
महोपकारिणं तदा भवन्तमात्मबान्धवं
समस्तलोकबान्धवोऽप्यमन्यत स्वयं विभुः ॥ ५॥
भवांश्च यत्र यत्र तत् शृणोति रामकीर्तनं
करोति तत्र तत्र भोः सभाष्पमस्तकाञ्जलिं ।
प्रदेहि मेऽञ्जनासुत त्वदीयभक्तिवैभवं
विदेहि मे निरञ्जनं च रामदासदासताम् ॥ ६॥
अगण्यपुण्यवान् भवान् अनन्यधन्यजीवनः
विमुच्य मौक्तिकस्रजं ददौ धरात्मजा मुदा ।
भवन्तमालिलिङ्ग यद् रघूत्तमः स्वयं वदन्
इदं हि मे हनूमतः प्रदेयसर्वमित्यहो ॥ ७॥
विदेहराजनन्दिनीमनोहरे वरे परे
विदेहमुक्तिदायके विधेहि मे मनो हरे ।
क्षणं क्षणं निरीक्षणं भवेद् यथा मयि प्रभोः
तथा निवेदयस्व मद्दशां दशाननान्तके ॥ ८॥

इदं च पञ्चचामरं गृहाण दासकल्पितं
समीरणात्मसंभव प्रमोदमानचेतसा ।
रिपून् षडान्तरान् विनाशयाशु दुर्दमान्
पुनर्भवाख्यकर्दमात् विमुच्य पाहि पाहि माम् ॥ ९॥

Encoded and proofread by N. Balasubramanian bbalu@satyam.net.in

---

Please send corrections to sanskrit@cheerful.com
Last updated April 20, 2005